country; (its chief town was कौशाम्बी and ruled over by Udayana), or the inhabitants of that country (pl.). **–त्सा** 1 A female calf. –2 A little girl; वत्से सीते 'dear Sītā' &c. **–त्सम्** The breast. **–Comp. –अक्षी** a kind of cucumber. **–अदनः** a wolf. (**–नी**) Cocculus Cordifolius (Mar. गुळवेल). **–अनुसारिणी** a hiatus between a long and a short syllable; also वत्सानुसृता-तिः. **–ईशः, –राजः** a king of the *Vatsas*; लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् Ratn. 1. **–काम** *a.* fond of children. (**–मा**) a cow longing for her calf or a mother for her child. **–तन्त्री** a rope for tying calves; न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति Ms. 4. 38. **–दन्तः** a kind of arrow. **–नाभः** 1 N. of a tree. –2 a kind of very strong poison. **–पत्तनम्** N. of the town Kauśāmbī. **–पदम्** a ford (Mar. उतार); भवाम्बुधिर्वत्सपदं परं पदम् Bhāg. 10. 14. 58. **–पालः** 'a keeper of calves', N. of Krisṇa or Balarāma. **–बन्धा** a cow longing for her calf. **–रूपः** a small calf; Hch. **–शाला** a cow-shed.

**वत्सकः** 1 A little calf, calf in general; भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकम् Ms. 11. 114. –2 A child. –3 N. of a plant (कुटज). **–कम्** Green or black sulphate of iron.

**वत्सतरः** A weaned calf, a steer, a young ox; महोक्षतां वत्सतरः स्पृशन्निव R. 3. 32. **–री** A heifer; श्रोत्रियायाभ्यागताय वत्सतरीं वा महोक्षं वा निर्वपन्ति गृहमेधिनः U. 4.; Ms. 11. 137; गावो वृषा वत्सतर्यः क्रन्दमानाः सुदुःखिताः Bhāg. 10. 16. 11.

**वत्सिका** A heifer.

**वत्सरः** [वस्-सरन् Uṇ. 3. 71] 1 A year; दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान् Y. 1. 205. –2 N. of Viṣṇu. **–Comp. –अन्तकः** the month, *Phālguna*. **–आदिः** the month of Mārgaśīrṣa; cf. मासानां मार्गशीर्षोऽहम्. **–ऋणम्** a debt to be paid by the end of a year.

**वत्सल** *a.* [वत्सं लाति ला-क Uṇ. 3. 74] 1 Child-loving, affectionate towards children or offspring; as वत्सला धेनुः, माता &c. –2 Affectionate towards, fondly loving, devoted to, fond of, kind or compassionate towards; त्वद्वत्सलः क स तपस्विजनस्य हन्ता Māl. 8. 8; 6. 14; R. 2. 69; 8. 41; so शरणागतवत्सल, दीनवत्सल &c. **–लः** 1 A fire fed with grass. –2 N. of Viṣṇu. –3 The sentiment of affection (वात्सल्यरस). **–ला** A cow fond of her calf. **–लम्** Affection, fondness; Pt. 2. 9. **–Comp. –रसः** the tender sentiment in a poem.

**वत्सलयति** Den. P. To cause to yearn, cause to feel yearning affection for; नूनमनपत्यता मां वत्सलयति Ś. 7.

**वत्सिन्, वत्सिमन्** *m.* Childhood, youth, early youth; धिक् चापले वत्सिमवत्सलत्वम् N. 3. 55.

**वत्सीयः** A cowherd.

**वद्** 1 P. (वदति, but Ātm. in certain senses and with certain prepositions; see below; उवाद, अवादीत्, वदिष्यति, वदितुम्, उदित; *pass.* उद्यते *desid.* विवदिषति) 1 To say, speak utter, address, speak to; वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते Ku. 5. 44; वदतां वरः R. 1. 59 'the foremost of the eloquent'. –2 To announce, tell, communicate, inform; यो गोत्रादि वदति स्वयम्. –3 To speak of, describe; आश्चर्यवद्वदति तथैव चान्यः Bg. 2. 29. –4 To lay down, state; श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः Ms. 2. 9; 4. 14. –5 To name, call; वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः Chandr. 5. 45; तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः Ku. 5. 28. –6 To indicate, bespeak; कृतज्ञतामस्य वदन्ति संपदः Ki. 1. 14. –7 To raise the voice, utter a cry, sing; कोकिलः पञ्चमेन वदति; वदन्ति मधुरा वाचः &c. –8 To show brilliance or proficiency in, be an authority on (Ātm.); शास्त्रे वदते Sk., पाणिनिर्वदते Vop. –9 To shine, look splendid or bright (Ātm.); लङ्कां समाविशद् रात्रौ वदमानोऽरिदुर्गमाम् Bk. 8. 27. –10 To maintain, affirm. –11 To toil, exert, labour (Ātm.); क्षेत्रे वदते Sk. –*Caus.* (वादयति, ते) 1 To cause to speak or say. –2 To cause to sound, play on a musical instrument; वीणामिव वादयन्ती Vikr. 1. 10; वादयते मृदु वेणुम् Gīt. 5. –3 To speak, recite.

**वद** *a.* Speaking, talking, speaking well.

**वदनम्** [उद्यतेऽनेन वद् करणे ल्युट्] 1 The face; आसीद्विवृत्तवदना च विमोचयन्ती Ś. 2. 13; so सुवदना, कमलवदना &c. –2 The mouth; वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा Bv. 1. 111. –3 Aspect, look, appearance. –4 The front point. –5 First term (in a series). –6 The summit or apex of a triangle. **–Comp. –आसवः** saliva. **–उदरम्** the jaws. **–कञ्जम्, पङ्कजम्** a lotus-face. **–पवनः** breath. **–मालिन्यम्** 1 a troubled face. –2 shame-faced appearance. **–श्यामिका** 1 blackness of the face. –2 a kind of disease.

**वदन्तिः** *f.* **वदन्ती** 1 Speech, discourse. –2 A story; L. D. B.

**वदनुः** [वद्-चनुङ् Uṇ. 3. 51] An orator.

**वदन्य** *a.* See वदान्य.

**वदर** See बदर.

**वदामः** An almond.

**वदालः** 1 A whirlpool. –2 A kind of sheat-fish.

**वदावद** *a.* [अत्यन्तं वदति वद्-अच् नि०] 1 A speaker, eloquent; सुभगमभिधास्यत्युद्दामा पराङ्कवदावदः N. 19. 24. –2 Talkative, garrulous; यत्र यद् व्यञ्जयामास महमूदो वदावदः Śiva B. 15. 45.

**वदान्य** *a.* [वद्-आन्यः Uṇ. 3. 103] 1 Speaking fluently, eloquent. –2 Speaking kindly or affably. –3 Liberal, munificent, generous; श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः Ms. 4. 224. **–न्यः** A liberal or generous person, munificent or bountiful man; शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः Bv. 1. 19; or तस्मै वदान्यगुरवे तरवे नमोऽस्तु 1. 94; N. 5. 11; R. 5. 24.